यावत् पुरस्तात्तपति तावत् पृष्ठेऽथ पार्श्वयोः॥१८॥
ऋतेऽमरगिरेर्मेरोरुपरि ब्रह्मणः सभाम्।
ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभाम्॥१९॥
ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै।
तस्माद्दिक्षूत्तरस्यां वै दिवारात्रिः सदैव हि।
सर्व्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः"॥२०॥

उदयास्तमने च सर्व्वकालं भवतः। ते च परस्परं संमुखे समानसूत्रस्थे भवतः। तत्र हेतुमाह। यथेति। रवेरुदयास्तमयौ सर्व्वकालं मध्याह्न एव सतोऽर्कस्य न स्त एव अतो रवेरुदयास्तमयत्वं दर्शनादर्शनमात्रमेव॥ दर्शनादर्शनयोरवधिमाह। शक्रादीनामिति। इन्द्राद्यन्यतमस्य पुरे मध्याह्ने तिष्ठंस्तदेकं पुरं अभितः पुरद्वयं चेत्येवं पुरत्रयं तदन्तरालस्थौ द्वौ च विकर्णौ कोणौ उदयाद्यवस्थाभिः स्पृशति स्वरश्मिभिर्भासयति। तथा विकर्णस्थः अग्न्याद्यन्यतमकोणे मध्याह्ने स्थितस्तं कोणं अभितः स्थितं कोणद्वयं चेत्येवं त्रीन् कोणान् तन्मध्यवर्त्तिनि द्वे च पुरे तथैवोदयाद्यवस्थाभिः स्पृशति। भूवलयस्यार्द्धं प्रतपन् दृश्यते तावद्दहः। अर्द्धं तु न दृश्यते तावद्रात्रिरित्यर्थः। तथाहि ऐन्द्रे पुरे मध्याह्ने यदा तिष्ठति तदा सौम्यपुरस्थानामस्तमयः। ऐशकोणस्थानां तृतीयो यामः। अग्निकोणस्थानां प्रथमः। याम्ये स्थितानामुदयः। एवं यदा याम्ये मध्याह्ने तिष्ठति तदा ऐन्द्रे अस्तमयः। अग्निकोणे तृतीयो यामः। नैर्ऋतिकोणे प्रथमो यामः। वारुणे उदयः। यदा च वारुणे मध्याह्नः तदा याम्ये अस्तमयः। नैर्ऋतिकोणे तृतीयो यामः। वायव्ये प्रथमः। सौम्ये उदयः। यदा सौम्ये मध्याह्नस्तदा वारुणे अस्तमयः। वायव्ये तृतीयो यामः। ऐशकोणे प्रथमः। ऐन्द्रे उदयः। एवं अग्निकोणे यदा मध्याह्नस्तदा ऐशकोणे अस्तमयः। इन्द्रपुरे तृतीयो यामः। यमपुरे प्रथमः। नैर्ऋतिकोणे उदयः। इत्यादि योज्यम्। एवं मेरोः सर्व्वतः परिभ्रमन् सूर्य्योऽर्द्धभूवलयं प्रकाशयन् दर्शनादर्शनाद्यपेक्षया अहोरात्रव्यवस्थाकारणमुक्तं भवति॥ सन्निधानव्यवधानकृतमेव रश्मीनां वृद्धिह्रासतीव्रत्वमन्दत्वादिकमपीत्याह। उदित इति गोभिः रश्मिभिः॥ दिग्विभागोऽप्युदयास्तमयनिमित्तएवेत्याह उदयेति। यत्र यस्योदेति सा तस्य पूर्व्वा दिक्। यत्रास्तमेति सा अपरा प्रतीची। तथा श्रुतिः। "तस्मादसावादित्यः सर्व्वाः प्रजाः प्रत्युदेति। तस्मात् सर्व्वा एवान्यतः प्रत्युदगादिति"॥ पुरस्तादुद्यन्तं सूर्य्यं पश्यतश्च दक्षिण-वाम-पार्श्वभागौ दक्षिणोत्तरे दिशाविति दर्शयन् रश्मिविस्तारावधिमाह। यावदिति। चतुर्दिक्षु लोकालोकाचलपर्य्यन्तं तपतीत्यर्थः॥ मेरौ तु विशेषमाह। ऋते इति। ब्रह्मसभावर्ज्जं मेरोरुपर्य्यपि सर्व्वतस्तपति न तु ब्रह्मसभां भासयति। तत्र हेतुमाह। ये ये मरीचय इति॥ मेरोः सर्व्वतोऽपि विशेषतान्तरमाह। तस्मादिति। यतो यस्मात् सर्व्वेषां द्वीपानां वर्षाणाञ्च मेरुरुत्तरत एव स्थितः। तस्मान्मेरोरुत्तरस्यां दिशि सदा दिवापि अन्येषां दिनेऽपि नित्यं रात्रिरेव। अयं भावः। मेरुं प्रदक्षिणीकुर्व्वन्तं सूर्य्यं ये यत्र पश्यन्ति सैव तेषां प्राची। तेषाञ्च वामभाग एव मेरुः। अतः सर्व्वेषां सर्व्वदा मेरुरुत्तरत एव। दक्षिणभागे च लोकालोकाचलः। तस्मादुत्तरस्यां दिशि सदा रात्रिः। दक्षिणस्याञ्च दिशि सदा दिनमिति। यद्वा। भारतादिवर्षस्थानां सम्मुखे सूर्य्यमुद्यन्तं पश्यतामुत्तरस्यां दिशि वामभागे मेरोरेकतः सदा दिनम्। अन्यतश्च सदा रात्रिः। दक्षिणभागे तु सदा दिनमेवेत्यर्थादुक्तं भवति"॥ इति तट्टीकायां श्रीधरस्वामी॥

उदयनं, क्ली (उत्+इ+ल्युट्।) उदयः। इति मेदिनी॥ (यथा ऋग्वेदे १।४८।७।
"एषा युक्ता परावतः सूर्य्यस्योदयनादधि"॥)

उदयनः, पुं, अगस्त्यमुनिः। वत्सराजः। इति मेदिनी॥ ("प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्"। इति मेघदूते।३९।) उदयनाचार्य्यः। स च कुसुमाञ्जलिग्रन्थकर्त्ता॥

उदरं, क्ली, (उत् ऋणातीति। "उदिदृणातेरजलौ पूर्व्वपदान्त्यलोपश्च"। उत्+दॄ+अच्। अन्त्यलोपश्च।) नाभिस्तनयोर्मध्यभागः। पेट इति भाषा। तत्पर्य्यायः। पिचण्डः २ कुक्षी ३ जठरः ४ तुन्दम् ५। इत्यमरः॥ युद्धम्। इति मेदिनी॥ ("उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्"। इति मनुः। ८।१२५॥)

उदरः, पुं, (उदरं अस्त्यस्य। अर्श आदित्वादच्।) उदरस्थरोगविशेषः। उदरी इति भाषा। यथा। अथोदराधिकारः। तत्रोदरस्य निमित्तमाह।
"रोगाः सर्व्वेऽपि मन्देऽग्नौ सुतरामुदराणि च।
अजीर्णान्मलिनैश्चान्यैर्जायन्ते मलसञ्चयात्"॥
अग्नौ मन्दे सर्व्वे रोगा जायन्ते किन्तु सुतरामतिशयेन उदराणि जायन्ते। अपरानपि हेतूनाह। अजीर्णान्मलिनैश्चान्यैः अत्यन्तदोषजनकैः मलसञ्चयात् मलानां दोषाणां पुरीषस्य चातिवृद्धेः। अत्रोदरशब्देनोदरस्थो रोग उच्यते। यत आह।
"तात्स्थ्यात्तद्धर्म्मताभ्याञ्च तत्समीपतयापि च।
तत्साहचर्य्यात् शब्दानां वृत्तिरुक्ता चतुर्व्विधा"॥*॥
संप्राप्तिमाह।
"रुद्धाः स्वेदाम्बुवाहीनि दोषाः स्रोतांसि सञ्चिताः।
प्राणाग्न्यपानान् संदूष्य जनयन्त्युदरं नृणाम्॥*॥
सामान्यरूपमाह।
"आध्मानं गमनेऽशक्तिर्दौर्ब्बल्यं दुर्ब्बलाग्निता।
शोथः सदनमङ्गानां सङ्गो वातपुरीषयोः।
दाहस्तन्द्रा च सर्व्वेषु जठरेषु भवन्ति हि॥*॥
सन्निकृष्टनिदानपूर्व्विकां संख्यामाह।
"पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु॥*॥
वातोदरस्य लक्षणमाह।
"तत्र वातोदरे शोथः पाणिपान्नाभिकुक्षिषु।
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्व्वभेदनम्॥
शुष्ककासोऽङ्गमर्द्दश्च गुरुता मलसंग्रहः।
श्यावारुणत्वगादित्वमकस्मान्मांसवृद्धिमत्॥
सतोदभेदमुदरं तनुकृष्णशिराततम्।
आध्मानादतिवच्छब्दमाहतं प्रकरोति च॥
वायुश्चात्र सरुक् शब्दो विचरेत् सर्व्वतोगतिः"॥
पाणिपादित्यत्र व्यञ्जनान्तः पाच्छब्द आर्षत्वात्। कुक्षिपार्श्वोदरेत्यत्र कुक्षिशब्द उदरस्य वामदक्षिणभागद्वयवाची। सर्व्वतोगतिः सकलकोष्ठे सञ्चरन्॥*॥ पैत्तिकमाह।
"पित्तोदरे ज्वरो मूर्च्छा दाहस्तृट् कटुकास्यता।
भ्रमोऽतिसारः पीतत्वं त्वगादावुदरं हरित्॥
पीतताम्रशिरानद्धं सस्वेदं सोष्म दह्यते।
धूमायते मृदुस्पर्शं क्षिप्रपाकं प्रदूयते"॥
हरित् शाकवर्णम्। सोष्म सन्तापयुक्तम्। दह्यते वह्निदाहयुक्तम्। धूमायते धूममिवोद्वमति। क्षिप्रपाकं क्षिप्रपाकात् जलोदरतां याति। प्रदूयते व्यथते॥*॥ कफोदरमाह।
"श्लेष्मोदरेऽङ्गसदनं स्वापश्वयथुगौरवम्।
तन्द्रोत्क्लेशोऽरुचिः श्वासः कासः शुक्लत्वगादिता॥
उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत्।
चिराभिवृद्धिकठिनं शीतस्पर्शं गुरु स्थिरम्"॥
स्वापः स्पर्शाज्ञता। गौरवमङ्गानाम्। तन्द्रा निद्राबाहुल्यम्। उत्क्लेशो हृल्लासः। शुक्लराजीततं शुक्लशिराव्याप्तम्॥*॥ सन्निपातोदरमाह।

"स्त्रियोऽन्नपानं नखलोममूत्र-
विडार्त्तवैर्युक्तमसाधुवृत्ताः।
यस्मै प्रयच्छन्त्यरयो गरांश्च
दुष्टाम्बुदूषीविषसेवनाच्च॥
तेनाशु रक्तं कुपिताश्च दोषाः
कुर्य्युः सुघोरं जठरं त्रिलिङ्गम्।
तच्छीतवाते भृशदुर्द्दिने च
विशेषतः कुप्यति दह्यते च॥
स चातुरो मूर्च्छति हि प्रसक्तं
पाण्डुः कृशः शुष्यति तृष्णया च।
दूष्योदरं कीर्त्तितमेतदेव
प्लीहोदरं कीर्त्तयतो निबोध"॥

स्त्रिय इत्यविवेकिसन्निहितजनोपलक्षणम्। ताश्च स्वसौभाग्यमिच्छन्त्यः। विट् मार्ज्जारादीनाम्। आर्त्तवं रजः। अरयो वा। गरान् संयोगजानि विषाणि। दुष्टाम्बु सविषमत्यद्वृणपर्णादियुतं शटितञ्च॥ दूषीविषं विषमेवामाद्युपघातेन स्वल्पप्रभावम्। यत उक्तम्।

"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितञ्च।
स्वभावतो वा गुणविप्रयुक्तं
विषं हि दूषीविषतामुपैति"॥

गुणविप्रयुक्तं गुणवियुक्तं तत्। उदरं शीततादिषु कुप्यति। दूषीविषस्य कोपात्। मूर्च्छातिविषयोगात्। प्रसक्तं निरन्तरं एतदेव सन्निपातोदरम्। तन्त्रान्तरे दूष्योदरं कीर्त्तितम्। अथवा परस्परं दूषयन्तीति दोषा एव दूष्याः तैः कृतमुदरं दूष्यो-